# चतुःश्लोकीभागवतम्

ज्ञानं परमगुह्यं मे यद् विज्ञानसमन्वितम् । ।। १ ।।
सरहस्यं तदङ्गं च ग्रहाण गदितं मया

यावानहं यथाभावः यद्रूपगुणकर्मकः। ।। २ ।।
तथैव तत्त्वविज्ञानं अस्तु ते मदनुग्रहात्

अहमेवास मेवाग्रे नान्यद् यत् सदसत्परम् । ।। ३ ।।
पश्चादहं त्वमेतच्च योऽवशिष्येत सोऽस्म्यहम्

ऋतेऽर्थं यत्प्रतीयेत न प्रतीयेत चात्मनि । ।। ४ ।।
तद्विद्यादात्मनो मायां यथाऽभासो यथा तमः

यथा महान्ति भूतानि भूतेषूच्चावचेषु च । ।। ५ ।।
प्रविष्टान्यप्रविष्टानि तथा तेषु न तेष्वहम्

एतावदेव जिज्ञास्यं  तत्वजिज्ञासुनाऽऽत्मनः । ।। ६ ।।
अन्वयव्यतिरेकाभ्यां यत् स्यात् सर्वत्र सर्वदा

एतन्मतं ममातिष्ठ परमेण  समाधिना । ।। ७ ।।
भवान्  कल्पविकल्पेषु न विमुह्यति कर्हिचित्

|| इति चतुःश्लोकीभागवतम् ||